# Panchamukhahanumat Kavacham

# પંચમુખહનુમત્કવચમ્

## Document Information

Text title : pa.nchamukhahanumatkavacham

File name : panchamukha.itx

Category : kavacha, hanumaana, bIjAdyAkSharamantrAtmaka

Location : doc_hanumaana

Author : Traditional

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com, Sunder Hattangadi, Gopal Upadhyay

Description-comments : sudarshanasa.nhitA

Latest update : May 28, 2021

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 25, 2025

*sanskritdocuments.org*

# પંચમુખહનુમત્કવચમ્

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીઉમામહેશ્વરાભ્યાં નમઃ ॥

॥ શ્રીસીતારામચન્દ્રાભ્યાં નમઃ ॥

॥ શ્રીપઞ્ચવદનાયાઞ્જનેયાય નમઃ ॥

અથ શ્રીપઞ્ચમુખીહનુમત્કવચપ્રારમ્ભઃ ॥

શ્રીપાર્વત્યુવાચ ।
સદાશિવ વરસ્વામિઞ્જ્ઞાનદ પ્રિયકારકઃ ।
કવચાદિ મયા સર્વં દેવાનાં સંશ્રુતં પ્રિય ॥ ૧॥

ઇદાનીં શ્રોતુમિચ્છામિ કવચં કરુણાનિધે ।
વાયુસૂનોર્વરં યેન નાન્યદન્વેષિતં ભવેત્ ।
સાધકાનાં ચ સર્વસ્વં હનુમત્પ્રીતિ વર્દ્ધનમ્ ॥ ૨॥

શ્રીશિવ ઉવાચ ।
દેવેશિ દીર્ઘનયને દીક્ષાદીપ્તકલેવરે ।
માં પૃચ્છસિ વરારોહે ન કસ્યાપિ મયોદિતમ્ ॥ ૩॥

કથં વાચ્યં હનુમતઃ કવચં કલ્પપાદપમ્ ।
સ્રીરૂપા ત્વમિદં નાનાકૂટમણ્ડિતવિગ્રહમ્ ॥ ૪॥

ગહ્વરં ગુરુગમ્યં ચ યત્ર કુત્ર વદિષ્યસિ ।
તેન પ્રત્યુત પાપાનિ જાયન્તે ગજગામિનિ ॥ ૫॥

અતએવ મહેશાનિ નો વાચ્યં કવચં પ્રિયે ॥ ૬॥

શ્રીપાર્વત્યુવાચ ।
વદાન્યસ્ય વચોનેદં નાદેયં જગતીતલે ।
સ્વં વદાન્યાવધિઃ પ્રાણનાથો મે પ્રિયકૃત્સદા ॥ ૭॥

મહ્યં ચ કિં ન દત્તં તે તદિદાનીં વદામ્યહમ ।
ગણપં શાક્ત સૌરે ચ શૈવં વૈષ્ણવમુત્તમમ્ ॥ ૮॥

મન્ત્રયન્ત્રાદિજાલં હિ મહ્યં સામાન્યતસ્ત્વયા ।
દત્તં વિશેષતો યદ્યત્તત્સર્વં કથયામિ તે ॥ ૯॥

શ્રીરામ તારકો મન્ત્રઃ કોદણ્ડસ્યાપિ મે પ્રિયઃ ।
નૃહરેઃ સામરાજો હિ કાલિકાદ્યાઃ પ્રિયંવદ ॥ ૧૦॥

દશાવિદ્યાવિશેષેણ ષોડશીમન્ત્રનાયિકાઃ ।
દક્ષિણામૂર્તિસંજ્ઞોઽન્યો મન્ત્રરાજો ધરાપતે ॥ ૧૧॥

સહસ્રાર્જુનકસ્યાપિ મન્ત્રા યેઽન્યે હનૂમતઃ ।
યે તે હ્યદેયા દેવેશ તેઽપિ મહ્યં સમર્પિતાઃ ॥ ૧૨॥

કિં બહૂક્તેન ગિરિશ પ્રેમયાન્ત્રિતચેતસા ।
અર્ધાઙ્ગમપિ મહ્યં તે દત્તં કિં તે વદામ્યહમ્ ।
સ્ત્રીરૂપં મમ જીવેશ પૂર્વં તુ ન વિચારિતમ્ ॥ ૧૩॥

શ્રીશિવ ઉવાચ ।
સત્યં સત્યં વરારોહે સર્વં દત્તં મયા તવ ।
પરં તુ ગિરિજે તુભ્યં કથ્યતે શ્રુણુ સામ્પ્રતમ્ ॥ ૧૪॥

કલૌ પાખણ્ડબહુલા નાનાવેષધરા નરાઃ ।
જ્ઞાનહીના લુબ્ધકાશ્ચ વર્ણાશ્રમબહિષ્કૃતાઃ ॥ ૧૫॥

વૈષ્ણવત્વેન વિખ્યાતાઃ શૈવત્વેન વરાનન ।
શાક્તત્વેન ચ દેવેશિ સૌરત્વેનેતરે જનાઃ ॥ ૧૬॥

ગાણપત્વેન ગિરિજે શાસ્ત્રજ્ઞાનબહિષ્કૃતાઃ ।
ગુરુત્વેન સમાખ્યાતા વિચરિષ્યન્તિ ભૂતલે ॥ ૧૭॥

તે શિષ્યસઙ્ગ્રહં કર્તુમુદ્યુક્તા યત્ર કુત્રાચિત્ ।
મન્ત્રાદ્યુચ્ચારણે તેષાં નાસ્તિ સામર્થ્યમમ્બિકે ॥ ૧૮॥

તચ્છિષ્યાણાં ચ ગિરિજે તથાપિ જગતીતલે ।
પઠન્તિ પાઠયિષ્યતિ વિપ્રદ્વેષપરાઃ સદા ॥ ૧૯॥

દ્વિજદ્વેષપરાણાં હિ નરકે પતનં ધ્રુવમ્ ।

પ્રકૃતં વચ્મિ ગિરિજે યન્મયા પૂર્વમીરિતમ્ ॥ ૨૦॥

નાનારૂપમિદં નાનાકૂટમણ્ડિતવિગ્રહમ્ ।
તત્રોત્તરં મહેશાને શ઼ૃણુ યત્નેન સામ્પ્રતમ્ ॥ ૨૧॥

તુભ્યં મયા યદા દેવિ વક્તવ્યં કવચં શુભમ્ ।
નાનાકૂટમયં પશ્ચાત્ત્વયાઽપિ પ્રેમતઃ પ્રિયમ્ ॥ ૨૨॥

વક્તવ્યં કત્રચિત્તત્તુ ભુવને વિચરિષ્યતિ ।
વિશ્વાન્તઃપાતિનાં ભદ્રે યદિ પુણ્યવતાં સતામ્ ॥ ૨૩॥

સત્સમ્પ્રદાયશુદ્ધાનાં દીક્ષામન્ત્રવતાં પ્રિયે ।
બ્રાહ્મણાઃ ક્ષત્રિયા વૈશ્યા વિશેષેણ વરાનને ॥ ૨૪॥

ઉચારણે સમર્થાનાં શાસ્ત્રનિષ્ઠાવતાં સદા ।
હસ્તાગતં ભવેદ્ભદ્રે તદા તે પુણ્યમુત્તમમ્ ॥ ૨૫॥

અન્યથા શૂદ્રજાતીનાં પૂર્વોક્તાનાં મહેશ્વરિ ।
મુખશુદ્ધિવિહીનાનાં દામ્ભિકાનાં સુરેશ્વરિ ॥ ૨૬॥

યદા હસ્તગતં તત્સ્યાત્તદા પાપં મહત્તવ ।
તસ્માદ્વિચાર્યદેવેશિ હ્યધિકારિણમમ્બિકે ॥ ૨૭॥

વક્તવ્યં નાત્ર સન્દેહો હ્યન્યથા નિરયં વ્રજેત્ ।
કિં કર્તવ્યં મયા તુભ્યમુચ્યતે પ્રેમતઃ પ્રિયે ।
ત્વયાપીદં વિશેષેણ ગેપનીયં સ્વયોનિવત્ ॥ ૨૮॥

ૐ શ્રી પઞ્ચવદનાયાઞ્જનેયાય નમઃ । ૐ અસ્ય શ્રી
પઞ્ચમુખહનુમન્મન્ત્રસ્ય બ્રહ્મા ઋષિઃ ।
ગાયત્રીછન્દઃ । પઞ્ચમુખવિરાટ્ હનુમાન્દેવતા । હ્રીં બીજમ્ ।
શ્રીં શક્તિઃ । ક્રૌં કીલકમ્ । ક્રૂં કવચમ્ । ક્રૈં અસ્ત્રાય ફટ્ ।
ઇતિ દિગ્બન્ધઃ । શ્રી ગરુડ ઉવાચ ।
અથ ધ્યાનં પ્રવક્ષ્યામિ શ઼ૃણુસર્વાઙ્ગસુન્દરિ ।
યત્કૃતં દેવદેવેન ધ્યાનં હનુમતઃ પ્રિયમ્ ॥ ૧॥

પઞ્ચવક્ત્રં મહાભીમં ત્રિપઞ્ચનયનૈર્યુતમ્ ।
બાહુભિર્દશભિર્યુક્તં સર્વકામાર્થસિદ્ધિદમ્ ॥ ૨॥

પૂર્વં તુ વાનરં વક્ત્રં કોટિસૂર્યસમપ્રભમ્ ।

દન્ષ્ટ્રાકરાલવદનં ભૃકુટીકુટિલેક્ષણમ્ ॥ ૩॥

અસ્યૈવ દક્ષિણં વક્ત્રં નારસિંહં મહાદ્ભુતમ્ ।
અત્યુગ્રતેજોવપુષં ભીષણં ભયનાશનમ્ ॥ ૪॥

પશ્ચિમં ગારુડં વક્ત્રં વક્રતુણ્ડં મહાબલમ્ ॥

સર્વનાગપ્રશમનં વિષભૂતાદિકૃન્તનમ્ ॥ ૫॥

ઉત્તરં સૌકરં વક્ત્રં કૃષ્ણં દીપ્તં નભોપમમ્ ।
પાતાલસિંહવેતાલજ્વરરોગાદિકૃન્તનમ્ ॥ ૬॥

ઊર્ધ્વં હયાનનં ઘોરં દાનવાન્તકરં પરમ્ ।
યેન વક્ત્રેણ વિપ્રેન્દ્ર તારકાખ્યં મહાસુરમ્ ॥ ૭॥

જઘાન શરણં તત્સ્યાત્સર્વશત્રુહરં પરમ્ ।
ધ્યાત્વા પઞ્ચમુખં રુદ્રં હનુમન્તં દયાનિધિમ્ ॥ ૮॥

ખડ્ગં ત્રિશૂલં ખટ્વાઙ્ગં પાશમઙ્કુશપર્વતમ્ ।
મુષ્ટિં કૌમોદકીં વૃક્ષં ધારયન્તં કમણ્ડલુમ્ ॥ ૯॥

ભિન્દિપાલં જ્ઞાનમુદ્રાં દશભિર્મુનિપુઙ્ગવમ્ ।
એતાન્યાયુધજાલાનિ ધારયન્તં ભજામ્યહમ્ ॥ ૧૦॥

પ્રેતાસનોપવિષ્ટં તં સર્વાભરણભૂષિતમ્ ।
દિવ્યમાલ્યામ્બરધરં દિવ્યગન્ધાનુલેપનમ્ ॥ ૧૧॥

સર્વાશ્ચર્યમયં દેવં હનુમદ્વિશ્વતોમુખમ્ ।
પઞ્ચાસ્યમચ્યુતમનેકવિચિત્રવર્ણવક્ત્રં
શશાઙ્કશિખરં કપિરાજવર્યમ ।
પીતામ્બરાદિમુકુટૈરુપશોભિતાઙ્ગં
પિઙ્ગાક્ષમાદ્યમનિશં મનસા સ્મરામિ ॥ ૧૨॥

મર્કટેશં મહોત્સાહં સર્વશત્રુહરં પરમ્ ।
શત્રુ સંહર માં રક્ષ શ્રીમન્નાપદમુદ્ધર ॥ ૧૩॥

ૐ હરિમર્કટ મર્કટ મન્ત્રમિદં
પરિલિખ્યતિ લિખ્યતિ વામતલે ।
યદિ નશ્યતિ નશ્યતિ શત્રુકુલં
યદિ મુઞ્ચતિ મુઞ્ચતિ વામલતા ॥ ૧૪॥

ૐ હરિમર્કટાય સ્વાહા ।

ૐ નમો ભગવતે પઞ્ચવદનાય પૂર્વકપિમુખાય
    સકલશત્રુસંહારકાય સ્વાહા ।

ૐ નમો ભગવતે પઞ્ચવદનાય દક્ષિણમુખાય કરાલવદનાય
    નરસિંહાય સકલભૂતપ્રમથનાય સ્વાહા ।

ૐ નમો ભગવતે પઞ્ચવદનાય પશ્ચિમમુખાય ગરુડાનનાય
    સકલવિષહરાય સ્વાહા ।

ૐ નમો ભગવતે પઞ્ચવદનાયોત્તરમુખાયાદિવરાહાય
    સકલસમ્પત્કરાય સ્વાહા ।

ૐ નમો ભગવતે પઞ્ચવદનાયોર્ધ્વમુખાય હયગ્રીવાય
    સકલજનવશઙ્કરાય સ્વાહા ।

ૐ અસ્ય શ્રી પઞ્ચમુખહનુમન્મન્ત્રસ્ય શ્રીરામચન્દ્ર
ઋષિઃ । અનુષ્ટુપ્છન્દઃ । પઞ્ચમુખવીરહનુમાન્ દેવતા ।
હનુમાનિતિ બીજમ્ । વાયુપુત્ર ઇતિ શક્તિઃ । અઞ્જનાસુત ઇતિ કીલકમ્ ।
શ્રીરામદૂતહનુમત્પ્રસાદસિદ્ધ્યર્થે જપે વિનિયોગઃ ।
ઇતિ ઋષ્યાદિકં વિન્યસેત્ ॥

ૐ અઞ્જનાસુતાય અઙ્ગુષ્ઠાભ્યાં નમઃ ।
ૐ રુદ્રમૂર્તયે તર્જનીભ્યાં નમઃ ।
ૐ વાયુપુત્રાય મધ્યમાભ્યાં નમઃ ।
ૐ અગ્નિગર્ભાય અનામિકાભ્યાં નમઃ ।
ૐ રામદૂતાય કનિષ્ઠિકાભ્યાં નમઃ ।
ૐ પઞ્ચમુખહનુમતે કરતલકરપૃષ્ઠાભ્યાં નમઃ ।
ઇતિ કરન્યાસઃ ॥

ૐ અઞ્જનાસુતાય હૃદયાય નમઃ ।
ૐ રુદ્રમૂર્તયે શિરસે સ્વાહા ।
ૐ વાયુપુત્રાય શિખાયૈ વષટ્ ।
ૐ અગ્નિગર્ભાય કવચાય હુમ્ ।
ૐ રામદૂતાય નેત્રત્રયાય વૌષટ્ ।
ૐ પઞ્ચમુખહનુમતે અસ્ત્રાય ફટ્ ।
પઞ્ચમુખહનુમતે સ્વાહા ।
ઇતિ દિગ્બન્ધઃ ॥

અથ ધ્યાનમ્ ।
વન્દે વાનરનારસિંહખગરાટ્ક્રોડાશ્વવક્ત્રાન્વિતં
દિવ્યાલઙ્કરણં ત્રિપઞ્ચનયનં દેદીપ્યમાનં રુચા ।
હસ્તાબ્જૈરસિખેટપુસ્તકસુધાકુમ્ભાઙ્કુશાદ્રિં હલં
ખટ્વાઙ્ગં ફણિભૂરુહં દશભુજં સર્વારિવીરાપહમ્ ।
અથ મન્ત્રઃ ।
ૐ શ્રીરામદૂતાયાઞ્જનેયાય વાયુપુત્રાય મહાબલપરાક્રમાય
સીતાદુઃખનિવારણાય લઙ્કાદહનકારણાય મહાબલપ્રચણ્ડાય
ફાલ્ગુનસખાય કોલાહલસકલબ્રહ્માણ્ડવિશ્વરૂપાય
સપ્તસમુદ્રનિર્લઙ્ઘનાય પિઙ્ગલનયનાયામિતવિક્રમાય
સૂર્યબિમ્બફલસેવનાય દુષ્ટનિવારણાય દૃષ્ટિનિરાલઙ્કૃતાય
સઞ્જીવિનીસઞ્જીવિતાઙ્ગદલક્ષ્મણમહાકપિસૈન્યપ્રાણદાય
દશકણ્ઠવિધ્વંસનાય રામેષ્ટાય મહાફાલ્ગુનસખાય સીતાસહિત-
રામવરપ્રદાય ષટ્પ્રયોગાગમપઞ્ચમુખવીરહનુમન્મન્ત્રજપે વિનિયોગઃ ।
ૐ હરિમર્કટમર્કટાય બંબંબંબંબં વૌષટ્ સ્વાહા ।
ૐ હરિમર્કટમર્કટાય ફંફંફંફંફં ફટ્ સ્વાહા ।
ૐ હરિમર્કટમર્કટાય ખેંખેંખેંખેંખેં મારણાય સ્વાહા ।
ૐ હરિમર્કટમર્કટાય લુંલુંલુંલુંલું આકર્ષિતસકલસમ્પત્કરાય સ્વાહા ।
ૐ હરિમર્કટમર્કટાય ધંધંધંધંધં શત્રુસ્તમ્ભનાય સ્વાહા ।
ૐ ટંટંટંટંટં કૂર્મમૂર્તયે પઞ્ચમુખવીરહનુમતે
પરયન્ત્રપરતન્ત્રોચ્ચાટનાય સ્વાહા ।
ૐ કંખંગંઘંઙં ચંછંજંઝંઞં ટંઠંડંઢંણં
તંથંદંધંનં પંફંબંભંમં યંરંલંવં શંષંસંહં
ળંક્ષં સ્વાહા ।
ઇતિ દિગ્બન્ધઃ ।
ૐ પૂર્વકપિમુખાય પઞ્ચમુખહનુમતે ટંટંટંટંટં
સકલશત્રુસંહરણાય સ્વાહા ।
ૐ દક્ષિણમુખાય પઞ્ચમુખહનુમતે કરાલવદનાય નરસિંહાય
ૐ હ્રાં હ્રીં હ્રૂં હ્રૈં હ્રૌં હ્રઃ સકલભૂતપ્રેતદમનાય સ્વાહા ।
ૐ પશ્ચિમમુખાય ગરુડાનનાય પઞ્ચમુખહનુમતે મંમંમંમંમં
સકલવિષહરાય સ્વાહા ।
ૐ ઉત્તરમુખાયાદિવરાહાય લંલંલંલંલં નૃસિંહાય નીલકણ્ઠમૂર્તયે

પઞ્ચમુખહનુમતે સ્વાહા ।
ૐ ઉર્ધ્વમુખાય હયગ્રીવાય રુંરુંરુંરુંરું રુદ્રમૂર્તયે
સકલપ્રયોજનનિર્વાહકાય સ્વાહા ।
ૐ અઞ્જનાસુતાય વાયુપુત્રાય મહાબલાય સીતાશોકનિવારણાય
શ્રીરામચન્દ્રકૃપાપાદુકાય મહાવીર્યપ્રમથનાય બ્રહ્માણ્ડનાથાય
કામદાય પઞ્ચમુખવીરહનુમતે સ્વાહા ।
ભૂતપ્રેતપિશાચબ્રહ્મરાક્ષસશાકિનીડાકિન્યન્તરિક્ષગ્રહ-
પરયન્ત્રપરતન્ત્રોચ્ચટનાય સ્વાહા ।
સકલપ્રયોજનનિર્વાહકાય પઞ્ચમુખવીરહનુમતે
શ્રીરામચન્દ્રવરપ્રસાદાય જંજંજંજંજં સ્વાહા ।
ઇદં કવચં પઠિત્વા તુ મહાકવચં પઠેન્નરઃ ।
એકવારં જપેત્સ્તોત્રં સર્વશત્રુનિવારણમ્ ॥ ૧૫॥

દ્વિવારં તુ પઠેન્નિત્યં પુત્રપૌત્રપ્રવર્ધનમ્ ।
ત્રિવારં ચ પઠેન્નિત્યં સર્વસમ્પત્કરં શુભમ્ ॥ ૧૬॥

ચતુર્વારં પઠેન્નિત્યં સર્વરોગનિવારણમ્ ।
પઞ્ચવારં પઠેન્નિત્યં સર્વલોકવશઙ્કરમ્ ॥ ૧૭॥

ષડ્વારં ચ પઠેન્નિત્યં સર્વદેવવશઙ્કરમ્ ।
સપ્તવારં પઠેન્નિત્યં સર્વસૌભાગ્યદાયકમ્ ॥ ૧૮॥

અષ્ટવારં પઠેન્નિત્યમિષ્ટકામાર્થસિદ્ધિદમ્ ।
નવવારં પઠેન્નિત્યં રાજભોગમવાપ્નુયાત્ ॥ ૧૯॥

દશવારં પઠેન્નિત્યં ત્રૈલોક્યજ્ઞાનદર્શનમ્ ।
રુદ્રાવૃત્તિં પઠેન્નિત્યં સર્વસિદ્ધિર્ભવેદ્ધ્રુવમ્ ॥ ૨૦॥

નિર્બલો રોગયુક્તશ્ચ મહાવ્યાધ્યાદિપીડિતઃ ।
કવચસ્મરણેનૈવ મહાબલમવાપ્નુયાત્ ॥ ૨૧॥

॥ ઇતિ શ્રીસુદર્શનસંહિતાયાં શ્રીરામચન્દ્રસીતાપ્રોક્તં
શ્રીપઞ્ચમુખહનુમત્કવચં સમ્પૂર્ણમ્ ॥

Proofread by Ravin Bhalekar ravibhalekar@hotmail.com
Sunder Hattangadi, Gopal Upadhayay

*Panchamukhahanumat Kavacham*

pdf was typeset on February 25, 2025

Please send corrections to *sanskrit@cheerful.com*